JSUNIL TUTORIAL
A CBSE Coaching for Mathematics and Science



D.W

# सङ्कलनात्मकं मूल्याङ्कनम् – II (2015-16)

## संस्कृतम् – सम्प्रेषणात्मकम्

## कक्षा – नवमी

समय : होरात्रयम् पूर्णाङ्काः 90

निर्देशाः

(i) प्रश्नपत्रे **चत्वारः खण्डाः** सन्ति।

| | | |
|---|---|---|
| खण्डः (क) अपठित-अवबोधनम् | – | 10 अङ्काः |
| खण्डः (ख) रचनात्मक-कार्यम् | – | 15 अङ्काः |
| खण्डः (ग) अनुप्रयुक्त-व्याकरणम् | – | 30 अङ्काः |
| खण्डः (घ) पठित-अवबोधनम् | – | 35 अङ्काः |

(ii) सर्वे प्रश्नाः **अनिवार्याः**।

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यमेव लेखनीया।

(v) उत्तराणि संस्कृतेनैव लेखनीयानि।

## खण्ड : 'क' अपठित-अवबोधनम् – ( 10 अङ्काः )

**अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**(2+2+4+2) 10

वैज्ञानिकाः सञ्चारसाधनेषु प्रतिदिनं नवीनतमान् आविष्कारान् कुर्वन्ति येन सन्देशप्रेषणे अधिकतमा सुविधा स्यात्। चलभाषित्रयन्त्रम् (मोबाइल सेल फोन) तादृशम् एव लोकप्रियं यन्त्रम्। बालाः, वृद्धाः, युवकाः पुरुषाः, महिलाः, नागरिकाः, ग्रामीणाः वा, सर्वेषाम् एव एतत् कर्णभूषणं जातम्. यानानि आरूढाः, कार्यालयेषु कार्यं कुर्वन्तः, मार्गेषु चलन्तः, सभागारेषु प्रवचनं शृण्वन्तः जनाः अस्य ध्वनिं श्रुत्वा वार्तामग्नाः भवन्ति। अविवेकपूर्णः अस्य प्रयोगः कार्येषु व्यवधानं करोति। मार्गेषु दुर्घटनाः भवन्ति। सभागारेषु, कक्षासु, अन्यसभासु वा अव्यवस्था भवति। सत्यम् अस्ति यत् आविष्कारः कदापि हानिकरः न, परन्तु तस्य दुष्प्रयोगेण जीवनस्य शान्तिः नश्यति। वस्तुतः वयं यन्त्रस्य अधीनाः न स्याम अपितु यन्त्रम् अस्माकम् अधीनं स्यात्। ते एव बुद्धिमन्तः ये विज्ञानस्य सदुपयोगं कुर्वन्ति।

I. **एकपदेन उत्तरत।**

(i) यन्त्रस्य दुष्प्रयोगेण कस्य शान्तिः नश्यति?

(ii) सर्वेषाम् कर्णभूषणं किम्?

II. **पूर्णवाक्येन उत्तरत।**

(i) के खलु बुद्धिमन्तः?

(ii) सभागारेषु यन्त्रस्य ध्वनिना किं भवति?

III. **निर्देशानुसारम् उत्तरत।**

(i) 'येन संदेशप्रेषणे अधिकतमा सुविधा स्यात्' अत्र विशेष्यपदम् किम्?


Downloaded from: http://jsuniltutorial.weebly.com/

JSUNIL TUTORIAL
A CBSE Coaching for Mathematics and Science

(अ) सुविधा (ब) अधिकतमा
(स) येन (द) संदेशप्रेषणे

(ii) 'करोति' इति क्रियापदस्य कर्ता कः ?
(अ) व्यवधानं (ब) कार्येषु
(स) प्रयोगः (द) अस्य

(iii) 'आकर्ण्य' इति पदस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?
(अ) नश्यति (ब) श्रुत्वा
(स) व्यवधानं (द) अधीनाः

(iv) 'तस्य' दुष्प्रयोगेण ---' अत्र सर्वनामपदं कस्मै प्रयुक्तम्।
(अ) मोबाइलाय (ब) जनाय
(स) जीवनाय (द) आविष्काराय

IV. **अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।**

## खण्डः 'ख' रचनात्मक-कार्यम् - ( 15 अङ्काः )

दिनेशस्य अनुजः मनीषः अम्बालानगरस्य छात्रावासे निवसति। सः अष्टमकक्षायाः छात्रः तं प्रति समयस्य सदुपयोगाय लिखितं पत्रं मञ्जूषायां दत्तैः पदैः पूरयत। 5

आर्मी एन्कलेव (i) ..........

तिथिः ..........

प्रिय मनीष!

(ii) .......... आशीषः।

मनीष। मानवस्य जीवनस्य प्रतिफलं (iii) .......... अस्ति। विश्वे प्रकृतेः सम्पूर्णानि कार्याणि नियमितसमये (iv) .......... । उचितसमये यदि वृष्टिः न भवेत् तदा सर्वं क्षेत्रं शुष्येत्। तथैव बाल्यकाले यदि छात्रः न पठेत् तदा असौ समस्तजीवने (v) .......... करोति। समयः तस्य एव जनस्य कार्येषु सहभागितां करोति यः (vi) .......... सदुपयोगं करोति। समयः कदापि कस्यचिदपि (vii) .......... न करोति। अतः (viii) .......... समयस्य सदुपयोग करणीयः। माता (ix) .......... कथयति। इति


भवतः (x) ..........

दिनेशः

JSUNIL TUTORIAL

मञ्जूषा : जालंधरत:, अग्रज:, सप्रेम, महत्त्वपूर्णम्, पश्चात्तापम्, प्रतीक्षां, समयस्य, सदा, भवन्ति, स्नेहम्।

3 मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्च वाक्यानि संस्कृतेन लिखत । (2x5=10) 10



मञ्जूषा

शिखराणि, कुसुमानि, हरीतिमा, तडाग:, तरन्ति, कमलानि, वर्तिका:, खगौ, पर्वता:, वृक्षा:, हंसा:, जले, वृक्षात्, दूरत:, सौन्दर्यम्।

अथवा

**'शाक–आपणस्य वर्णनम्'** इति विषयम् अधिकृत्य संस्कृतेन पञ्चवाक्यानि लिखत।(2x5=10) 10

**मञ्जूषा**–क्रेतार:, विक्रेतार:, कोलाहलम्, उच्चै:, इतस्तत:, अस्वच्छता, हरीति:, भिण्डि:, आलुकम्, पलाण्डु: जनानाम् समूह:, सम्मर्द:, क्रीणन्ति, कंचन, सज्जा, द्रष्टुम्, कुत्रचित्।

## खण्ड: 'ग' अनुप्रयुक्त व्याकरणम् - ( 30 अङ्का: )

4 उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत। 6

(i) ………………… विद्यालये रक्षक: न निवसति।

(अ) भवत: (ब) भवान् (स) भवते (द) भवति

(ii) मधुरता ………………… मुखस्य लक्षणम् भवति।

(अ) विदुषा (ब) विदुषाम् (स) विद्वान् (द) विदुषी

(iii) परोपकारेण ………………… तुष्यति।

(अ) आत्मन: (ब) आत्मनि (स) आत्मा (द) आत्मानम्

(iv) भो: ………………… ! तिष्ठतु।



Downloaded from: http://jsuniltutorial.weebly.com/ Page no: 03

JSUNIL TUTORIAL
A CBSE Coaching for Mathematics and Science

(अ) राजन्   (ब) राजा   (स) राजानम्   (द) राज्ञः

(v) जनाः .................... वदन्ति।

(अ) गच्छन्   (ब) गच्छन्तौ   (स) गच्छन्तः   (द) गच्छनतम्

(vi) .................... कुत्र गन्तुम् इच्छन्ति?

(अ) भवान्   (ब) भवन्तौ   (स) भवन्तः   (द) भवताम्

5 उचितसंख्यापदैः रिक्त स्थानानि पूरयत। 6

(i) .................... मालाकाराः पादपान् आरोपयन्ति। (चतुर्)
(ii) .................... फलानि वृक्षात् पतन्ति। (पञ्च)
(iii) .................... बालकाः तत्र खेलन्ति। (त्रि)
(iv) .................... कन्ये लिखतः (द्वि)
(v) .................... नराणां मध्ये एकः बालः अपि अस्ति। (पञ्चन्)
(vi) .................... कन्याभिः एतत् कृतम्। (त्रि)

6 प्रदत्तविकल्पेभ्यः उचितधातुरूपाणि चित्वा रिक्तस्थानानि पूरयत। 6

(i) विद्वांसः सर्वं सन्मार्गे .................... ।

(अ) नयतु   (ब) नयताम्
(स) नयन्तु   (द) नय

(ii) जनाः सर्वत्र .................... ।

(अ) मोदताम्   (ब) मोदेताम्
(स) मोदन्ताम्   (द) मोदस्व

(iii) अध्यापकः-हे छात्राः। यत्र सन्देहः तत्र .................... ।

(अ) पृच्छतम्   (ब) पृच्छत
(स) पृच्छानि   (द) पृच्छ

(iv) वयम् अपि एवं .................... ।

(अ) चिन्तयेत्   (ब) चिन्तयेताम्
(स) चिन्तयेयुः   (द) चिन्तयेम

(v) वयं कदाचित् न .................... ।

(अ) याचेय   (ब) याचेवहि
(स) याचेरन्   (द) याचेमहि

(vi) सर्वे एव सुखाय .................... ।

(अ) इच्छ   (ब) इच्छन्तु
(स) इच्छतु   (द) इच्छानि



Downloaded from: http://jsuniltutorial.weebly.com/ 

7 प्रदत्तविकल्पेभ्यः उचित-उपपदविभक्तियुक्तं पदं चित्वा रिक्तस्थानेषु लिखत। 6

(i) बाला: .................. प्रति गन्तुं न उत्सुका: सन्ति।

(अ) गृहे (ब) गृहस्य

(स) गृहम् (द) गृहात्

(ii) .................. धिक्।

(अ) दुष्टेभ्यः (ब) दुष्टाः

(स) दुष्टान् (द) दुष्टानाम्

(iii) .................. अलम्।

(अ) चिन्ताम् (ब) चिन्तायाः

(स) चिन्तया (द) चिन्तायाय

(iv) .................. मा प्रमदः।

(अ) स्वाध्यायेन (ब) स्वाध्यायात्

(स) स्वाध्यायस्य (द) स्वाध्याये

(v) .................. दक्षिणतः विवेकानन्दस्मारकः अस्ति।

(अ) भारतम् (ब) भारतस्य

(स) भारते (द) भारतात्

(vi) माता .................. स्निह्यति।

(अ) कन्याम् (ब) कन्यायाः

(स) कन्यायाम् (द) कन्यया

8 **अधोलिखितवाक्येषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा प्रदत्तविकल्पेभ्यः चित्वा लिखत।** 6

(i) __________ बालकम् दृष्ट्वा शिक्षकः अक्रुध्यत्। (क्रीड्+शतृ)

(अ) क्रीडतः (ब) क्रीडति

(स) क्रीडन्तम् (द) क्रीडत्

(ii) कम्पमानः चौरः अवदत्।

(अ) कम्प् + शतृ (ब) कम्प् + शानच्

(स) कम्प् + क्त (द) कम्प् + क्तवतु

(iii) वणिजा रूप्यकाणि गणितानि।

(अ) गण् + क्त (ब) गण् + क्तवतु

(स) गण् + शतृ (द) गण् + शानच्

(iv) मयूरः वर्षाकाले वने नर्तितवान्।

(अ) नृत् + शतृ (ब) नृत् + शानच्

(स) नृत् + क्त (द) नृत् + क्तवतु

(v) कथां (कथ् + शतृ) __________ पितामहः प्रसन्नः अस्ति।



Downloaded from: http://jsuniltutorial.weebly.com/ Page no: 05

(अ) कथयन्तम् (ब) कथयत्
(स) कथयन् (द) कथयन्तः

(vi) वरः वधूम् स्वगृहम् (नी + क्तवतु) __________ ।
(अ) नीतवान् (ब) नीतवन्तः
(स) नीतवती (द) नीतम्

## खण्ड : 'घ' पठित-अवबोधनम् - 35 अङ्काः

9 अधोलिखितं गद्यांशं पठित्वा प्रदत्त-प्रश्नानां उत्तराणि लिखत-(2+1+2) 5

साधु कुविन्द! साधु! कीदृशी लालित्यपूर्णा पदयोजना 'कवयामि वयामि यामि'- धन्योऽसि त्वम्। अहमपि आत्मानं धन्यं मन्ये, यस्य राज्ये तन्तुवायाः, कुम्भकाराः, अयस्काराः, शिल्पिनः, श्रमिकाः अपि ललितां काव्यरचनां कुर्वन्ति। (तन्तुवायं प्रति) भोः कविवर! गृहाण पुष्कलं स्वर्णमयं पारितोषिकम्। निजम् आवासम् च प्रयाहि। (मन्त्रिणं प्रति) पण्डितः लक्ष्मीधरः मम राजभवने वासयितव्यः, यावद् अपरा व्यवस्था न भवति।

I. एकपदेन उत्तरत।
(i) भोजः कं धन्यं वदति?
(ii) पारितोषिकं कीदृशम् आसीत्?

II. पूर्णवाक्येन उत्तरत।
भोजः तन्तुवायं किमर्थं सम्मानयति?

III. निर्देशानुसार उत्तरत-
(i) 'लौहकाराः' इति पदस्य किम् पर्यायं अनुच्छेदे प्रयुक्तम्?
(अ) अयस्काराः (ब) कुम्भकाराः
(स) शिल्पिनः (द) श्रमिकाः
(ii) 'कीदृशी' इत्यस्य विशेष्यपदं किम्?
(अ) लालित्यपूर्णा (ब) पदयोजना
(स) यामि (द) साधु

10 अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत :- (2+1+2) 5

स्नेहं ददाति यो मह्यं नित्यं तस्मै ददाम्यहम्।
ज्योतिः पदार्थज्ञानार्थं कोऽहं वदतु साम्प्रतम्॥

I. एकपदेन उत्तरत।
(i) यः कोऽपि महयम नित्यं किम् ददाति ?
(ii) श्लोके कस्मिन् विषये उक्तम् ?

Downloaded from: http://jsuniltutorial.weebly.com/

II. पूर्णवाक्येन उत्तरत। दीपकः

दीपकः स्नेहं गृहीत्वा किम् ददाति ?

III. निर्देशानुसारम् उत्तरत-

(i) 'महयम्' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(अ) स्नेहाय (ब) दीपकाय

(स) ज्योतिषे (द) पदार्थज्ञानाय

(ii) 'इदानीम् पदस्य पर्यायपदं किं प्रयुक्तम् ?

(अ) नित्यम (ब) स्नेहम्

(स) अहम् (द) सम्प्रति

11 अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत।(2+1+2) 5

मन्त्री: यथा आज्ञापयति देवः। (निष्क्रम्य पुनः नगरपालेन सह प्रविश्य)

नगरपाल: महाराज! मन्त्रिवरस्य आदेशेन अहं समस्ते नगरे भ्रान्त्वा कमपि निरक्षरं मूर्खं वा जनम् न अपश्यम्। कुत्र वासयितव्यः पण्डितवर्यः ?

भोजराज: (क्षणं विचार्य) भो नगरपाल! त्वं भूयः नगरं याहि। यः नागरिकः काव्यं कर्तुं न जानाति, स निष्कास्यताम्।

I. एकपदेन उत्तरत।

(i) नगरपालेन सह कः प्रविशति ?

(ii) कः क्षणं विचार्य नगरपालम् आदिशति ?

II. पूर्णवाक्येन उत्तरत।

राजाज्ञया कः निष्कास्यताम् ?

III. भाषिककार्यम्।

(i) 'पण्डितः' इति पदस्य कः विपर्ययः संवादे आगतः ?

(अ) निरक्षरं (ब) मूर्खः

(स) काव्यं (द) कविम्

(ii) 'गच्छ' इति अर्थे किं पद्म् आगतम् ?

(अ) प्रविश्य (ब) अपश्यम्



Downloaded from: http://jsuniltutorial.weebly.com/ 

(स) याहि (द) निष्कास्यताम्

12 **अधोलिखितश्लोकयोः अन्वययोः रिक्तस्थानानि पूरयत।( ½ x 10 =5)** 5

(क) स्नेहं ददाति यो मह्यं नित्यं तस्मै ददाम्यहम्।
ज्योतिः पदार्थज्ञानार्थं कोऽहं वदतु साम्प्रतम्।।

अन्वयः - (i)____मह्यम् नित्यम्(ii)____ददाति(iii)____तस्मै(iv) ____ज्योतिः ददामि। साम्प्रतंवदतु(v) ____कः अस्मि।

(ख) यानस्यांगम् हरेः शस्त्रम्, चिह्नं भारतभूपतेः।
चलन्तं वर्तुलाकारं, यो जानाति सः पण्डितः।।

अन्वयः - (i)____ अंगम् हरेः (ii)____ भारतभूपतेः (iii)____(iv) ____ चलन्तम् यः जानाति (v) ____ पण्डितः।

13 **रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।** 5

(i) अष्टावक्रः मित्रैः सह क्रीडित्वा प्रत्यावृत्तः।
(ii) अष्टावक्रः मातरम् अपृच्छत् - क्व आस्ते मे पिता?
(iii) श्वः प्रभाते अहम् राजसभां गमिष्यामि।
(iv) अष्टावक्रः सर्वशास्त्रपारंगतः आसीत्।
(v) अहं पित्रा सह क्षिप्रम् आगमिष्यामि।

14 **अधोलिखितानि वाक्यानि कथाक्रमेण संयोज्य लिखत।(½ x 10 = 5)** 5

७(1) तन्तुवायः स्वकाव्येन नृपं प्रभावितं करोति।
6(2) त्वं राजकोषात् धनं नीत्वा अन्यत्र स्थानं गच्छ।
९(3) राजा तन्तुवायाय स्वर्णमुद्राः अर्पयति।
8(4) तव गृहे एषः पण्डितवरः स्थास्यति।
1(5) एकः विद्वान् राज्ञः भोजस्य सभायाम् आगच्छति।
9(6) अहम् तन्तुवायः त्रुटितान् तन्तून् संयोजयामि।
3(7) नगरपालः नगरे कमपि मूर्खं निरक्षरं वा जनम् न अपश्यत्।
(8) अनुकूलः शुचिः दक्षः कविः विद्वान् सुदुर्लभः भवति।
5(9) यः जनः काव्यं कर्तुं न जानाति सः निष्कास्यताम्।
2(10) 'अहं भवतः राज्ये निवस्तुम् इच्छामि' इति लक्ष्मीधरः कथयति।

15 **रेखाङ्कितशब्दानाम् अर्थान् विकल्पेभ्यः चित्वा लिखत।** 5

(i) मुनिः पिपासया पीडितोऽभवत्।

 Downloaded from: http://jsuniltutorial.weebly.com/ 

(अ) शुष्कः (ब) आर्द्रः (स) तृषया

(ii) तत्र मधुरं संगीतं जनयन्ति स्म।

(अ) जनाः (ब) उत्पादयन्ति स्म (स) ज्ञापयति

(iii) तम् अनुसृत्य स अग्रे गतः।

JSUNIL TUTORIAL
A CBSE Coaching for Mathematics and Science

(अ) चोरयति (ब) अनुसरणं कृत्वा (स) अध्यासते

(iv) सर्वे भद्राणि पश्यन्तु।

(अ) सज्जनः (ब) कल्याणं (स) भाद्रपद

(v) भारतीय विज्ञानपरम्परा अति उत्कृष्टा आसीत्।

(अ) ज्ञानाय (ब) श्रेष्ठा (स) कठिनं

-o0o0o0o-

JSUNIL TUTORIAL